## यथातथयोरसूयाप्रतिवचने । (२८/३३४९)

कृञः सिद्धाप्रयोगे [1]इति वर्तते । यथातथाशब्दयोरुपपदयोः [2]कृञो णमुल् प्रत्ययो भवति असूयाप्रतिवचने गम्यमाने[3] । यद्यसूयन् पृच्छति प्रतिवक्ति तत्र प्रतिवचनम्[4], यथाकारमहं भोक्ष्ये, तथाकारमहं, किं तवानेन ? असूयाप्रतिवचने इति किम् ? यथा कृत्वाऽहं भोक्ष्ये, तथा त्वं द्रक्ष्यसि । सिद्धाप्रयोगे इत्येव, [5]यथा कृत्वाऽहं शिरो भोक्ष्ये, किं तवानेन ॥

## कर्मणि दृशिविदोः साकल्ये । (२९/३३५०)

कर्मण्युपपदे साकल्यविशिष्टे[6]ऽर्थे [7]दृशिविदोः धात्वोः णमुल् प्रत्ययो भवति । कन्यादर्शं वरयति । याः याः कन्याः पश्यति [8]तास्ताः वरयति इत्यर्थः । ब्राह्मणवेदं भोजयति । यं यं ब्राह्मणं जानाति लभते विचारयति वा [9]तान् सर्वान् भोजयति इत्यर्थः । साकल्ये इति किम् ? ब्राह्मणं दृष्ट्वा भोजयति ॥

## यावति विन्दजीवोः । (३०/३३५१)

यावच्छब्द उपपदे [10]विन्दतेर्जीवतेश्च[11]णमुल् प्रत्ययो भवति । यावद्वेदं भुङ्क्ते । यावल्लभते तावद् भुङ्क्ते इत्यर्थः । यावज्जीवमधीते[12] । [13]यावज्जीवति तावदधीते इत्यर्थः[14] ॥

## चर्मोदरयोः पूरेः । (३१/३३५२)

कर्मणि इत्येव । चर्मोदरयोः [15]कर्मणोरुपपदयोः पूरयतेः[16] णमुल् प्रत्ययो भवति । चर्मपूरं स्तृणाति । उदरपूरं भुङ्क्ते[17] ॥

## वर्षप्रमाण ऊलोपश्चास्यान्यतरस्याम् । (३२/३३५३)

[18]कर्मणि इत्येव । पूरयतेः [19]धातोः णमुल् प्रत्ययो भवति, [20]ऊलोपश्चास्य पूरयतेरन्यतरस्यां भवति, समुदायेन चेद् वर्षस्य प्रमाणम् इयत्ता गम्यते । गोष्पदपूरं वृष्टो देवः, गोष्पदप्रं वृष्टो देवः । [21]सीतापूरं वृष्टो देवः, सीताप्रं वृष्टो देवः । अस्यग्रहणं किमर्थम् । उपपदस्य मा भूत् । मूषिकाबिलपूरं वृष्टो [22]देवः, मूषिकाबिलप्रम् ॥

## चेले क्नोपेः । (३३/३३५४)

कर्मणि इत्येव । 'क्नूयी [23]शब्दे उन्दने च' (धा.पा.४८५), [24]अस्माण्ण्यन्ताद् धातोः चेलार्थेषु कर्मसु उपपदेषु णमुल् प्रत्ययो भवति, वर्षप्रमाणे गम्यमाने । चेलक्नोपं वृष्टो देवः । वस्त्रक्नोपम्[25] । वसनक्नोपम्[26] ॥

---

1. इत्येव क. ह. 2. करोतेः फ. 3. अक्षमा असूया इत्यधिकम् ब. 4. असूयाप्रतिवचनं इत्यधिकम् ब.ह. 5. तथा ब. ह. 6. अर्थे नास्ति ब. 7. वर्तमानयोः इत्यधिकम् फ. 8. ताः सर्वाः ब. फ. ह. 9. तं तं सर्वं ब. क. फ. 10. विन्देः ब. क. फ. 11. धातोः इत्यधिकम् क. फ, धात्वोः इत्यधिकम् ब. 12. अर्चति ब. 13. वाक्यमिदं नास्ति ह. 14. सूत्रमिदं नास्ति ह. 15. कर्मवाचिनोरुपपदयोः अ. ब. 16. धातोः इत्यधिकम् अ. ब. क. ह. 17. उदरं पूरयन् भुङ्क्ते इत्यर्थः इत्यधिकम् क. 18. कर्मणि उपपदे ब. ह. 19. धातोः नास्ति ब. 20. ऊकारलोपः ब. फ. 21. उदाहरणमिदं नास्ति फ. ह. 22. देवः नास्ति फ. ह. 23. शब्दे नास्ति फ. 24. इत्यस्माद् धातोः ब. 25. वृष्टो देवः इत्यधिकम् फ. 26. वृष्टो देवः इत्यधिकम् ह.